# दिल्ली पब्लिक स्कूल, फरीदाबाद

Dated : 23.09.16
Time : 3 hrs.
M.M. : 90
P.S. : 7

**प्रथम-सत्रीय-परीक्षा 2016-2017**

**विषय-संस्कृतम्, कक्षा - नवमी**

नाम ---------------------------------- अनुक्रमांकः-------------- विभागः --------नि०ह०----------

**खण्डः 'क' अपठित-अवबोधनम् (10 अङ्काः)**

प्र01 **निम्नलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत -**

रामायणम् अस्माकं धर्मग्रन्थः अस्ति। रामायणस्य रचयिता महर्षिः वाल्मीकिः आसीत्। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तान्तम् अस्ति। भगवान् श्रीरामः स्वपितुः आज्ञायाः पालनाय चतुर्दशवर्षाणि वने अवसत्। तेन सह तस्य भार्या सीता अनुजः लक्ष्मणश्च अपि वनम् अगच्छताम्। वने लंकायाः नृपः रावणः सीताम् अहरत्। तत्र श्रीरामः सुग्रीव-हनुमान-अंगदादीनां वानराणां साहय्येन रावणं हत्वा सीताम् अलभत। रामायणं भारतस्य आदिकाव्यम् अस्ति। रामायणे 'बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तर' इति सप्तकाण्डानि विद्यन्ते। आदिकविना विरचितः अयं काव्यग्रन्थः अस्माकं राष्ट्रस्य अमूल्या निधिः अस्ति। रामायणं पठित्वा जनाः शान्तिप्रियाः सदाचारिणः च भवन्ति। एतादृशं प्रियं महाकाव्यं जगति अन्यत्र न उपलभ्यते।

**अ. एकपदेन उत्तरत।** 2

क. रामायणस्य रचयिता कः आसीत्?

ख. लंकायाः नृपः कः आसीत्?

ग. श्रीरामः कति वर्षाणि वने अवसत्?

घ. रामायणे कस्य जीवनस्य वृत्तान्तम् अस्ति?

**आ. पूर्णवाक्येन उत्तरत।** 2

क. रामायणं पठित्वा जनाः कीदृशाः भवन्ति?

ख. रामायणस्य सप्तकाण्डानां नामानि लिखत।

**इ. भाषिककार्यम् -** 4

क. 'भवन्ति' इति क्रियापदस्य कर्तृपदम् किम्?

अ. रामायणं आ. जनाः इ. शान्तिप्रियाः ई. सदाचारिणः

ख. 'कलहप्रियाः' इति पदस्य विलोमपदं अत्र किम् अस्ति?

अ. अमूल्या आ. शान्तिप्रियाः इ. सदाचारिणः ई. धरोहरः

ग. 'अमूल्या निधिः' इत्यत्र विशेष्यपदं किम्?

अ. अमूल्या आ. निधिः इ. अस्माकम् ई. काव्यग्रन्थः

घ. 'तस्य भार्या' अत्र 'तस्य' इति पदं कस्मै प्रयुक्तम्?

अ. रामाय आ. रावणाय इ. लक्ष्मणाय ई. सीतायै

**ई. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** 2

**खण्डः - 'ख' रचनात्मक-कार्यम् (15 अङ्काः)**

प्र02 **भवान् वसन्तः अस्ति। मित्रं वल्लभः अष्टमकक्षायाम् अष्टनवतिः प्रतिशतम् अंकान् प्राप्य उत्तीर्णः अभवत्। तं प्रति लिखिते वर्धापनपत्रे मञ्जूषातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयन्तु।** ½×10=5

**मञ्जूषा** - नमो नमः, कुशलं, पत्रं, प्राप्य, वसन्तः, अष्टमकक्षायाम्, प्रार्थना, परिश्रमस्य, शतम्, प्रणामं

प्रिय मित्र वल्लभ,

सस्नेहं (क) ------------------।

अत्र सर्वं (ख) ---------------------- भवताम् अपि इच्छामि। अद्यैव अहं तव (ग) ---------------

प्राप्तवान्। पत्रेण मया ज्ञातं यत् त्वम् (घ) --------------------------- अष्टनवतिः प्रतिशतम् अङ्कान्

(ङ)-------------------------- उत्तीर्णः अभवः। संस्कृतविषये तु त्वं (च)-----------------------

अङ्कान् लब्धवान्। मित्र! मत्पक्षतः कोटिशः वर्धापनानि स्वीकुरु। एतत् तु तव (छ)--------------------

एव फलम् अस्ति। ईश्वरः अग्रे इतोऽप्यधिकां सफलतां भवते प्रयच्छतु इति एषा मम (ज) ----------------।

पितृभ्यां मम (झ) ---------------- निवेदय। अनुजाय च स्नेहः।

तव अभिन्नं मित्रम्

(ञ)-------------------

प्र03 चित्रं दृष्ट्वा दत्त-पदानां सहायतया पञ्च वाक्यानि लिखत। 2×5=10



पदानि –

| |
|---|
| क्रीडाक्षेत्रम्, शिशवः, क्रीडनम्, धावन्ति, कूर्दन्ति, धावनप्रतियोगिता, आनन्दं, जनाः, बालाः, व्यायामः, नित्यं, क्रीडास्पर्धायाः। |

अथवा

"मम परिवारः" इति विषये सरल-संस्कृते पञ्च वाक्यानि लिखत।

## खण्डः 'ग' अनुप्रयुक्त-व्याकरणम् (30 अङ्काः)

प्र04 प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। 1×4=4

क. न्+आ+ग्+अ+र्+इ+क्+आः।

अ. नगरिकः आ. नागरिकाः इ. नागरकः ई. नागरीकः

ख. उच्चारणम् ----------------

अ. उ+च्+आ+र्+ण+म्   आ. उ+च्+च्+अ+र्+ण+अ

इ. उ+च्+अ+र्+आ+ण+अ+म्   ई. उ+च्+च्+आ+र्+अ+ण+अ+म्

ग. अधोलिखितेषु कः वर्णः कण्ठ्यः?

अ. अ आ. ट् इ. प् ई. च्

घ. त्रीणि = त्+————————+ई+ण्+इ।

अ. ज् आ. ञ् इ. र् ई. द्

प्र05 विकल्पेभ्यः रेखाङ्कितपदानि आश्रित्य सन्धिं सन्धिच्छेदं वा कुरुत। 5

क. सुख+अर्थी विद्यां न लभते।

अ. सुखर्थी आ. सुर्खाथी इ. सुखार्थी ई. सुखार्थि

ख. चन्द्रोदयः अन्धकारं हरति।

अ. चन्द्र+उदयः आ. चन्दो+दय इ. चन्द्र+ओदय ई. चन्द्र+आदयः

ग. मम परीक्षायाः परि+नामः उत्तमः अस्ति।

अ. परीणाम् आ. परिनामः इ. परिनाम् ई. परिणामः

घ. रक्षसाः नीरसम् भोजनं खादन्ति।

अ. निर्+रसम् आ. नीर्+रसम् इ. नीर+सरम् ई. निर्+सम्

ङ. प्रातर्वन्दनीयाः गुरुजनाः भवन्ति।

अ. प्रातः+वन्दनीयाः आ. प्रातर्+वन्दनियाः इ. प्रातः+वन्दनीयाः ई. प्रात+वन्दीयः

प्र06 कोष्ठकशब्देषु उचितां विभक्तिं योजयित्वा रिक्तस्थानं पूरयत। 5

क. अ. ———————— अभितः पुष्पाणि सन्ति। (गृह)

आ. भीमः ———————— प्रवीणः आसीत्। (मल्लयुद्ध)

इ. सीता ———————— न विभेति। (सिंह)

ख. अ. ———————— पुरतः नारदः आगच्छत्।

1. विप्रस्य 2. विप्राय
3. विप्रम् 4. विप्रात्

आ. ——————— नमः।

1. शिवेन 2. शिवस्य
3. शिवाय 4. शिवम्

प्र07 विकल्पेभ्यः उचितं पदं चित्वा रिक्तस्थानानि पूरयत। 5

अ. क. अत्र ———————— रक्षकः नास्ति।

अ. बालकम् आ. बालकस्य इ. बालकेन ई. बालकात्

ख. पुत्रः ———————— नमति।

अ. मातरि आ. मातुः इ. मातरम् ई. मात्रे

ग. वानराः ———————— खादन्ति।

अ. फलानि आ. फलाय इ. फलेषु ई. फलानाम्

आ. क. ———————— विद्यालयः सुन्दरः अस्ति। (अस्मद्)

ख. कालिदासः ———————— शिरोमणिः अस्ति। (कवि)

प्र08 **विकल्पात् उचितं पदं चित्वा रिक्तस्थानं पूरयत।** 5

अ. क. ते छात्राः सफलाः ----------------। (भू-लट्)

ख. वयं ह्यः संस्कृतम् ----------------। (पठ्-लङ्)

आ. क. बालः गुरुजनान् ----------------।

1. सेव से 2. सेवति 3. सेवते 4. सेवे

ख. अहं जनकं ----------------।

1. नमामि 2. नमति 3. नमन्ति 4. नमसि

ग. हे बालाः! यूयं सफलतां ----------------।

1. लभते 2. लभध्वे 3. लभे 4. लभामहे

प्र09 **निम्नलिखितेषु वाक्येषु कोष्ठकशब्देषु प्रत्यय-विभागं कृत्वा संयोज्य वा रिक्तस्थानानि पूरयत।** 6

अ. क. बालकाः (पठ्+तुमुन्) ---------------- विद्यालयं गच्छन्ति।

ख. सः उद्याने (क्रीड्+क्त्वा) ---------------- गृहम् आगच्छति।

ग. माता फलानि (आदाय) ---------------- आगच्छति।

आ. क. शानः आपणं <u>गम्+तुमुन्</u> इच्छति।

1. गन्तम् 2. गतम् 3. गन्तुम् 4. गमितम्

ख. जलं <u>पीत्वा</u> विश्रामं कुरु।

1. पा+त्वा 2. पा+क्त्वा 3. पी+क्त्वा 4. पी+त्वा

ग. शिक्षकं <u>प्र+नम्+ल्यप्</u> एव अध्ययनं कुर्यात्।

1. प्रणाम 2. प्रनमय 3. प्रणल्य 4. प्रणम्य

## खण्ड -"घ" पठित-अवबोधनम् (अङ्काः 35)

प्र010 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच - हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं, यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्। एवंभूतं पुत्रं दृष्ट्वा पिता उवाच - हे श्वेतवेतो! कः ते उपाध्यायात् अतिशयः प्राप्तः येन त्वं कुलाननुरूपम् उद्धतः असि? जानासि किं तत् येन श्रुतेन अन्यत् अश्रुतं अपि श्रुतं भवति, अमतं मतं, अविज्ञातं च विज्ञातं भवति इति।

क. **शुद्धं उत्तरं चिनुत।** 2

अ. कस्य पुत्रः श्वेतकेतुः आसीत्। (आरुणिः, आरुणेः)

आ. सः कान् अधीत्य पितुः सकाशम् आगच्छत्। (वेदम्, वेदान्)

ख. **पूर्णवाक्येन उत्तरत।** 1

पिता पुत्रं किं अपृच्छत्?

ग. **निर्देशानुसारं शुद्धं उत्तरं चिनुत।** 2

अ. 'वेदान्' अस्य पदस्य विशेषणपदं लिखत। (सर्वान्, सार्थान्)

आ. 'मतम्' पदस्य विपर्ययः लिखत। (अमतं, अविज्ञातं)

इ. 'आसीत्' अस्य क्रियापदस्य कर्तृपदं लिखत। (महर्षिः, आरुणिः, श्वेतकेतुः)

ई. 'समीपम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्? (सार्थान्, सकाशम्)

प्र011 **अधोलिखितं पद्यांशं पठित्वा यथोचित्तम् उत्तरत।**

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।

**क. एकपदेन उत्तरत।** 2

अ. शास्त्रानुसारेण कः अन्धः? (विद्याहीनः / विद्वान्)

आ. किम् सर्वस्य लोचनम् अस्ति? (दर्शकम् / शास्त्रम्)

**ख. पूर्णवाक्येन उत्तरत।** 1

अ. शास्त्रम् किम् किम् करोति?

**ग. निर्देशानुसारम् उत्तरत।** 2

अ. 'नास्त्यन्धः' पदस्य विच्छेदम् कुरुत।

आ. 'सर्वस्य' अत्र का विभक्तिः अस्ति?

प्र012 **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

रामः - मे शापितो न परिरक्षसि चेत् स्वराज्यम्।
भरतः - हन्त! अनुत्तरम् अभिहितम्। भवतु, समयतः ते राज्यं परिपालयामि।
रामः - वत्सः! कः समयः?
भरतः - मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिगृहीतुम् इच्छामि।
रामः - एवमस्तु।
भरतः - आर्य! अन्यमपि वरं हर्तुम् इच्छामि।
रामः - वत्स! किमिच्छसि? किमहं ददामि? किम् अहम् अनुष्ठास्यामि?

**क. एकपदेन उत्तरत।** 1

अ. रामः कस्मै शापस्य भयम् प्रयच्छति? (लक्ष्मणाय / भरताय)

आ. भरतः अन्यम् किम् इच्छति? (वरं / राज्यं)

**ख. पूर्णवाक्येन उत्तरत।** 2

अ. भरतस्य कः समयः?

आ. भरतः रामाय कदा किं च प्रतिगृहीतुम् इच्छति?

**ग. निर्देशानुसारम् उत्तरत।** 2

अ. 'अनुष्ठास्यामि' पदे कः लकारः?

ख. 'परिरक्षसि' अस्य क्रियापदस्य कर्तृपदं लिखत।

प्र013 **समुचित-पदेन रिक्तस्थानानि पूरयत, येन भावः स्पष्टः भवेत्।** 4

**अ. क. नानृतं ब्रूयात्।**

कदापि ------------------ न वदेत्। सदैव ------------------ वदेत्।

**ख. यः सर्वमर्पयति चान्यस्य सुखस्य हेतोः।**

वृक्षः जनेभ्यः स्व-पत्राणि पुष्पापि फलानि सर्वाणि एव ------------------। स्वयम् आतपे तिष्ठति, अन्यस्य ------------------ हेतो एव फलति।

| सत्यं, अर्पयति, सुखस्य, असत्यं |
|---|

आ. क. **अधोलिखितेषु कथनयोः उचितभावार्थं चित्वा लिखत।**

अ. 'तत्त्वमसि' इति वाक्यस्य अर्थः अस्ति -

1. आत्मा अविनाशी अस्ति।
2. त्वम् ज्ञानवान् असि।
3. त्वम् आत्मा असि।

ख. फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।

1. वृक्षाः सत्पुरुषाः इव फलानाम् संग्रहणम् कुर्वन्ति।
2. वृक्षाः सत्पुरुषाः इव परार्थाय जीवन्ति।
3. वृक्षाः सत्पुरुषाः इव वैभवम् इच्छन्ति।

**प्र014 अधोदत्तयोः श्लोकार्थयोः अन्वय पूर्तिः क्रियताम्।** 4

क. यदि सत्संगतिरतो भविष्यसि भविष्यसि।
अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि।

*अन्वयः* - यदि ———————— भविष्यसि, भविष्यसि। अथ ————————————
पतिष्यसि।

ख. सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्।।

*अन्वयः* - ———————— तु लीलया प्रोक्तम् ———————— अक्षरम् (इव भवति। असद्भिः शपथेन अपि जले लिखितम् अक्षरम्। (इव भवति)।

**प्र015 रेखांकितपदानां कृते उचितं प्रश्ननिर्माणपदं विकल्पेभ्यः चिनुत।** 4

क. <u>गुरु-वृद्ध-आचार्यान्</u> अर्चयेत्।

अ. कान् आ. काः इ. कस्मै ई. केषाम्

ख. <u>विद्याहीनाः</u> न शोभन्ते।

अ. कः आ. कम् इ. के ई. कान्

ग. मूढैः <u>पाषाणखण्डेषु</u> रत्नसंज्ञा विधीयते।

अ. कस्मै आ. केषु इ. काः ई. केषाम्

घ. "इक्ष्वाकुमार" इति सम्बोधनं <u>भरताय</u> प्रयुक्तम्।

अ. कस्मै आ. कैः इ. कम् ई. कस्मिन्

**प्र016 क्रमरहित-वाक्यानाम् क्रमपूर्वकसंयोजनम् कृत्वा पुनः लिखत।** 4

क. ब्राह्मणः नकुलं बालरक्षार्थं व्यवस्थाप्य गच्छति।
ख. उज्जयिन्यां माधवो नाम विप्रः वसति।
ग. ब्राह्मणः श्राद्धं गृहीत्वा प्रत्यागच्छति।
घ. ब्राह्मणः श्राद्धर्थं राज्ञा निमन्त्रितः भवति।
ङ. ब्राह्मणः सुस्थं पुत्रं दृष्ट्वा विषादमनुभवति।
च. नकुलः बालकस्य समीपम् आगच्छन्तं सर्पं मारयति।
छ. ब्राह्मणः श्राद्धर्थं राज्ञः प्रासादं गच्छति।
च. नकुलस्य मुखं रक्तविलिप्तं भवति।

प्र017 **शब्दानाम् मेलनम् अर्थैः सह क्रियताम्।** 2+2

**अ.**

| | | |
|---|---|---|
| क. | सत्वरम् | अवलोक्य |
| ख. | निरीक्ष्य | शीघ्रम् |
| ग. | विप्रः | समीपं गत्वा |
| घ. | उपसृत्य | ब्राह्मणः |

**आ. विपरीतार्थकपदैः सह मेलनं क्रियताम्।**

| | | |
|---|---|---|
| *यथा* | *यौवनम्* | *वार्धक्यम्* |
| क. | अनधिगतशास्त्राः | सुमार्गगामिनः |
| ख. | विद्वान् | अधिगतशास्त्राः |
| ग. | उन्मार्गगामिनः | मित्रम् |
| घ. | शत्रुः | मूर्खः |

# DELHI PUBLIC SCHOOL, FARIDABAD

1st Semester EXAMINATION, 2016-17

## MARKING SCHEME

CLASS - IX SUBJECT - Sanskrit DATE - 23/9/2016 MAX MARKS - 90

| Q. NO. | | MARKS |
|---|---|---|
| प्र०1, अ, | एकपदेन उत्तरत | 2 |
| क, | वाल्मीकि: | |
| ख. | रावण: | |
| ग. | चतुर्दश वर्षाणि | |
| घ. | श्रीरामस्य | |
| आ, | पूर्णवाक्येन | 2 |
| | क. जना: शान्तिप्रिया: सदाचारिणः च भवन्ति । | |
| | ख. "बाल-अयोध्या-अरण्य-किष्किंधा-सुन्दर-युद्ध-उत्तर" | |
| इ. | भाषिक कार्यम् | 4 |
| क, | जना: | |
| ख. | शान्तिप्रिया: | |
| ग. | निधि: | |
| घ. | रामाय | |
| ई. | राष्ट्रस्य अमूल्या निधि: रामायणम् । | 2 |
| प्र० 2, | नमो नम:, कुशलम्, पत्रम्, अष्टमकक्षायाम्, प्राप्य, शतम्, परिश्रमस्य, प्रार्थना, प्रणामम्, वसन्त: | 5 |

NAME AND SIGNATURE OF SUBJECT COORDINATOR

# DELHI PUBLIC SCHOOL, FARIDABAD

______________ EXAMINATION, 2016-17

## MARKING SCHEME

CLASS - __________ SUBJECT - __________ DATE - __________ MAX MARKS - ______

| Q. NO. | | MARKS |
|---|---|---|
| प्र०3. | चित्रं दृष्ट्वा संस्कृते पञ्चवाक्यानि रचयत। | 10 |
| खण्ड: ख | | |
| प्र०4. | क. नागरिका: ख. उत्+चि+अण्+र्+ण्+अ+म्<br>ग. अ, इ, | 4 |
| प्र०5. | क. सुखार्थी, ख. चन्द्र + उदय:, ग. परिणाम:<br>घ. ~~नीर~~ निर् + रसम् ङ. प्रात: + वन्दनीया: | 5 |
| प्र०6. | अ. गृहेण, आ. मल्लयुद्धे इ. सिंहासने<br>ई. विप्रस्य उ. शिवाम् | 5 |
| प्र०7. | क. बालकस्य, ख. मातरम् ग. फलानि<br>क. अस्माकम्/मम ख. कवीनाम् | 5 |
| प्र०8. | क. भवन्ति ख. अपठाम<br>क. सेवते, ख. नमामि ग. लभध्वे | 5 |
| प्र०9. | क. पठितुम् ख. क्रीडित्वा, ग. आ+दा+ल्यप्<br>क. गन्तुम् ख. पा+क्त्वा ग. प्रणम्य | 6 |

NAME AND SIGNATURE OF SUBJECT COORDINATOR ______________

# DELHI PUBLIC SCHOOL, FARIDABAD

## ______________ EXAMINATION, 2016-17

## MARKING SCHEME

CLASS - __________ SUBJECT - __________ DATE - __________ MAX MARKS - ______

| Q. NO. | | MARKS |
|---|---|---|
| खण्ड 'घ' | | |
| प्र० 10 | क. अ. आरुणेः आ. वेदान् | 2 |
| | ख. जानासि किं तत् येन श्रुतेन अन्यत् अश्रुतं अपि श्रुतं भवति। अमतं मतं, अविज्ञातं च विज्ञातं भवति | 1 |
| | ग. अ. सार्थान् आ. अमतम्, इ. श्वेतकेतुः ई. सकाशात् | 2 |
| प्र० 11 | क. अ. विद्याहीनः आ. शास्त्रम् | 2 |
| | ख. अनेकं संशयं छेदयति, परोक्षार्थस्य दर्शकं च भवति। | 1 |
| | ग. अ. नास्ति + अन्धः आ. षष्ठी | 2 |
| प्र० 12 | क. अ. भरताय आ. वचनं | 1 |
| | ख. अ. रामस्य राज्यं चतुर्दशवर्षान्ते प्रतिगृहीतुं इच्छति। | 2 |
| | आ. भरतः रामाय चतुर्दशवर्षान्ते राज्यं प्रति गृहीतुम् इच्छति। | |
| | ग. अ. लट् आ. भरतः | 2 |
| प्र० 13 | अ. क. असत्यम्, सत्यम् | 4 |
| | ख. अर्धमति सुरक्षस्य | |

NAME AND SIGNATURE OF SUBJECT COORDINATOR __________ __________

# DELHI PUBLIC SCHOOL, FARIDABAD

______________ EXAMINATION, 2016-17

## MARKING SCHEME

CLASS - __________ SUBJECT - __________ DATE - __________ MAX MARKS - ______

| Q. NO. | | MARKS |
|---|---|---|
| | आ. क. त्वम् आत्मा असि । | |
| | ख. वृक्षाः सत्पुरुषाः इव परार्थाय जीवन्ति | |
| प्र०14 | क. सत्संगतिरतः, दुर्जन संसर्गो | 5 |
| | ख. सद्गतिः शिलालिखितम् | |
| प्र०15 | क. मार्ग ख. के ग. केषु घ. कस्मै | 5 |
| प्र०16 | ख, घ, क, छ, च, ग, ज, ङ | 5 |
| प्र०17 | अ. क. शीघ्रम् ख. अवलोक्य ग. ब्राह्मणः घ. समीपं गत्वा । | 5 |
| | आ. क. अधिगतशास्त्राः ख. मूर्खः ग. सुमार्गगामिनः घ. मित्रम् | |

NAME AND SIGNATURE OF SUBJECT COORDINATOR Mukund Pandey